१३ शीङ्स्थासोऽधेराधारः ॥ १।३।१२२ ॥

अधिपूर्वाणां शीङ् स्था आस् इत्येतेषां य आधारः क्रियाश्रयस्य कर्तुः कर्मणो वा धारणात् अधिकरणं तत् कर्म भवति। ग्राममधिशेते। ग्राममधितिष्ठति। ग्राममध्यास्ते। अधेरिति किम्? ग्रामे शेते। पर्वते तिष्ठति। नद्यामास्ते।

हैम० अधेः शीङ्स्थाऽऽस आधारः ॥ २।२।२० ॥

अधेः सम्बद्धानां शीङ्स्थाऽऽसामाधारः कर्म्म स्यात्। ग्राममधिशेते, अधितिष्ठति, अध्यास्ते वा।

पा० अधिशीङ्स्थासां कर्म । १।४।४६ । सि० कौ० सू० ५४२ ॥

अधिपूर्वाणामेषामाधारः कर्म स्यात् । अधिशेते-अधितिष्ठति-अध्यास्ते-वा वैकुण्ठं हरिः ।

१४ वसोऽनूपाध्याङः ॥१।२।१२६॥

अनु उप अधि आङ् इत्येतत्पूर्वस्य वसतेर्य आधारः तत्कर्म भवति । ग्राममनुवसति । ग्राममुपवसति । ग्राममधिवसति । ग्राममावसति ।

हैम० उपान्वध्याङ्वसः ॥ २।२।२१ ॥

उपादिविशिष्टस्य वसतेराधारः कर्म्म स्यात् । ग्राममुपवसति, अनुवसति, अधिवसति, आवसति ।

पा० उपान्वध्याङ्वसः ।१।४।४८ ॥ सि० कौ० सू० ५४४ ॥

उपादिपूर्वस्य वसतेराधारः कर्म स्यात् । उपवसति-अनुवसति-अधिवसति-आवसति वा वैकुण्ठं हरिः ।

१५ कालाध्वनोर्व्याप्तौ ॥ १।२।१२६ ॥

काले अध्वनि चाप्रधाने वर्तमानात् व्याप्तौ अमौट्शसो भवन्ति । मासं गुडापूपाः । मासमधीते । क्रोशं कुटिला नदी । व्याप्ताविति किम् ? मासेऽधीते । मासस्याधीते । क्रोशेऽधीते । क्रोशस्याधीते ।

हैम० कालाध्व-भाव-देशं वाऽकर्म्म चाकर्म्मणाम् ॥ २।२।२३ ॥

कालादिराधारेऽकर्मणां धातूनां योगे कर्म्माकर्म्म च युगपद्वा स्यात् । मासमास्ते, क्रोश शेते, गोदोहमास्ते, कुरूनास्ते । पक्षे-मासे आस्ते इत्यादि । अकर्म चेति किम् ? मासमास्यते । अकर्मणामिति किम् ? रात्रावुद्देशोऽधीतः ।

पा० 'अकर्मकधातुभिर्योगे देशः कालो भावो गन्तव्योऽध्वा च कर्मसंज्ञक इति वाच्यम्' (वा० ११०३-११०४) ।

कुरून् स्वपिति । मासमास्ते । गोदोहमास्ते । क्रोशमास्ते ।

पा० कालाध्वनोरत्यन्तसंयोगे ।२।३।५ ॥ सि० कौ० सू० ५५८॥

इह द्वितीया स्यात् । मासं कल्याणी । मासमधीते । मासं गुडधानाः ।

क्रोशं कुटिला नदी। क्रोशमधीते। क्रोशं गिरिः। अत्यन्त संयोगे किम्। मासस्य द्विरधीते। क्रोशस्यैकदेशे पर्वतः।

११ नित्याकर्मकगमिज्ञाद्यर्थशब्दकर्मदृशोऽखादादिक्रन्दशब्दायह्वः ॥ १।३।११८ ॥

नित्यमकर्मकेभ्यः गमेर्ज्ञानातेरदेशश्चार्थो येषां तेभ्यः शब्दकर्मभ्यः शब्दनक्रियेभ्यः शब्दार्थेभ्यः दृशित्येतस्माच्च धातोर्यो णिस्तस्य कर्म नित्यं कर्म भवति खादादि क्रन्द शब्दायह्व इत्येतान् वर्जयित्वा। आसयति देवदत्तम्। शाययति देवदत्तम्। गमयति माणवकं ग्रामम्। यापयति माणवकं ग्रामम्। ज्ञापयति माणवकं धर्मम्। बोधयति माणवकं धर्मम्। भोजयति माणवकमोदनम्। आशयति माणवकमोदनम्। शब्दनक्रियेभ्यः— विलापयति देवदत्तं पुत्रम्। आभाषयति देवदत्तं गुरुम्। शब्दार्थेभ्यः— श्रावयति देवदत्तं शास्त्रम्। उपलम्भयति देवदत्तं विद्याम्। दृश्—दर्शयति रूपतर्कं कार्षापणम्।

हैम० गति-बोधाहारार्थ-शब्दकर्मनित्याऽकर्मणामनीखाद्यदिह्वाशब्दाय-क्रन्दाम् ॥ २।२।५ ॥

गतिर्देशान्तरप्राप्तिः। शब्दः कर्मक्रिया व्याप्यश्च येषां ते शब्द कर्माणः। नित्यं न विद्यते कर्म येषां ते नित्याकर्माणः। गत्यर्थबोधार्थाहारार्थानां शब्दकर्मणां नित्याकर्मणाञ्च नीखाद्यदि ह्वाशब्दायक्रन्दिवर्जानां धातूनामणिक्कर्ता स णौ सति कर्म स्यात्। गमयति चैत्रं ग्रामम्, बोधयति शिष्यं धर्म्मम्, भोजयति बटुमोदनम्, जल्पयति मैत्रं द्रव्यम्, अध्यापयति बटुं वेदम्। शाययति मैत्रं चैत्रः। गत्यर्थादीनामिति किम्? पाचयत्योदनं चैत्रेण मैत्रः। न्यादिवर्ज्जनं किम्? नाययति भारं चैत्रेण, खादयत्यपूपं मैत्रेण, आदयत्योदनं सुतेन, ह्वाययति चैत्रं मैत्रेण, शब्दाययति बटुं मैत्रेण क्रन्दयति मैत्रं चैत्रेण।

पा० गतिबुद्धिप्रत्यवसानार्थशब्दकर्माकर्मकाणामणि कर्ता स णौ ॥१।४।५२॥ सिद्धा० कौ० सू० ५४०।

गत्याद्यर्थानां शब्दकर्मणामकर्मकाणां चाणौ यः कर्ता स णौ कर्म स्यात्।

गति—इत्यादि किम्। पाचयत्योदनं देवदत्तेन। अण्यन्तानां किम्। गमयति देवदत्तो यज्ञदत्तं, तमपरः प्रयुङ्क्ते, गमयति देवदत्तेन यज्ञदत्तं विष्णुमित्रः।

नीवह्योर्न वा० ११०९। नाययति, वाहयति वा भारं भृत्येन।

नियन्तृकर्तृकस्य वहेरनिषेधः वा० १११०। वाहयति रथं वाहान्सूतः।

आदिखाद्योर्न वा० ११०९। आदयति, खादयति वा अन्नं बटुना।

भक्षेरहिंसार्थस्य न वा० ११११। भक्षयत्यन्नं बटुना। अहिंसार्थस्य किम्। भक्षयति बलीवर्दान्सस्यम्।

जल्पतिप्रभृतीनामुपसंख्यानम् वा० ११०७। जल्पयति, भाषयति वा धर्मं पुत्रं देवदत्तः।

दृशेश्च वा० ११०८। दर्शयति हरिं भक्तान्। सूत्रे ज्ञानसामान्यार्थानामेव ग्रहणं, न तु तद्विशेषार्थानामित्यनेन ज्ञाप्यते। तेन स्मरति जिघ्रति इत्यादीनां न। स्मारयति घ्रापयति वा देवदत्तेन।

शब्दायतेर्न वा० ११०५। शब्दाययति देवदत्तेन। धात्वर्थसंगृहीतकर्मत्वेनाकर्मकत्वात्प्राप्तिः। येषां देशकालादिभिन्नं कर्म न संभवति तेऽत्राकर्मकाः। न त्वविवक्षितकर्माणोऽपि। 'तेन मासमासयति देवदत्तम्' इत्यादौ कर्मत्वं भवति। 'देवदत्तेन पाचयति' इत्यादौ तु न।

१७ हेतुकर्तृकरणेत्थंभूतलक्षणे ॥ १।२।१२८ ॥

फलसाधनयोग्यः पदार्थो हेतुः। यः करोति स कर्ता। येन क्रियते तत्करणम्। इमं कञ्चित् प्रकारमापन्नः इत्थंभूतः, स लक्ष्यते येन तदित्थंभूतलक्षणम्। एतस्मिन् विषये वर्तमानात् टाभ्यांभिसो भवन्ति। हेतौ—धनेन कुलम्। विद्यया यशः। कर्तरि—देवदत्तेन कृतम्। जिनदत्तेन भुक्तम्। करणे—दात्रेण लुनाति। परशुना छिनत्ति। इत्थंभूतलक्षणे—अपि

भवान् कमण्डलुना छात्रमद्राक्षीत् ? अपि च भवानवदातेन वर्णेन कुमारी-मैक्षिष्ट ?

हैम०—हेतु-कर्तृ-करणेत्थम्भूतलक्षणे ॥ २।२।४४ ॥

फलसाधनयोग्यो हेतुः। कश्चित्प्रकारमापन्नस्य चिह्नं इत्थम्भूतलक्षणम्। हेत्वादिवृत्तेर्नाम्नस्तृतीया स्यात्। धनेन कुलम्। चैत्रेण कृतम्। दात्रेण लुनाति। अपि त्वं कमण्डलुना च्छात्रमद्राक्षीः ?

पा० हेतौ।२।३।२३ ॥ सि० कौ० सू० ५६८ ॥

हेत्वर्थे तृतीया स्यात्। द्रव्यादि साधारणं निर्व्यापारसाधारणं च हेतुत्वम्। करणत्वं तु क्रियामात्रविषयं व्यापारनियतं च। दण्डेन घटः। पुण्येन दृष्टो हरिः। फलमपीह हेतुः। अध्ययनेन वसति।

कर्तृकरणयोस्तृतीया ॥ २।३।१८ ॥ सि० कौ० सू० ५६१।

अनभिहिते कर्तरि करणे च तृतीया स्यात्। रामेण बाणेन हतो बाली।

इत्थंभूतलक्षणे ॥ २।३।२१ ॥ सि० कौ० सू० ५६६।

कश्चित्प्रकारं प्राप्तस्य लक्षणे तृतीया स्यात्। जटाभिस्तापसः। जटा-ज्ञाप्यतापसत्वविशिष्ट इत्यर्थः।

२० टाभ्यांभिस्सिद्धौ ॥ १।१।१२७ ॥

सिद्धौ क्रियानिष्पत्तौ द्योत्यायां कालवाचिनोऽध्ववाचिनश्च शब्दात् व्याप्तौ एकद्विबहुषु टाभ्यांभिस इत्येते यथासंख्यं प्रत्ययाः भवन्ति। मासेन, मासाभ्यां, मासैर्ज्योतिषमधीतम्। योजनेन, योजनाभ्यां, योजनैः वैद्यमधीतम्।

हैम०—सिद्धौ तृतीया ॥ २।२।४३ ॥

सिद्धौ फलनिष्पत्तौ, द्योत्यायां कालाध्ववाचिभ्यां टाभ्यां–भिस्लक्षणा तृतीया यथासंख्यमेक-द्विबहौ स्यात्। मासेन मासाभ्यां मासैर्वा आवश्यकम-धीतम्। क्रोशेन क्रोशाभ्यां क्रोशैर्वा प्राभृतमधीतम्। सिद्धाविति किम् ? मासमधीत आचारो नानेन गृहीतः।

पा० अपवर्गे तृतीया ।२।३।६ ॥ सि० कौ० सू० ५६३ ॥

अपवर्गः फलप्राप्तिः, तस्यां द्योत्यायां कालाध्वनोरत्यन्तसंयोगे तृतीया स्यात् । अह्ना क्रोशेन वा अनुवाकोऽधीतः । अपवर्गे किम् । मासमधीतो नायातः ।

२१ सहार्थेन ॥ १।३।१२९ ॥

सहार्थस्तुल्ययोगो विद्यमानता च, तेन युक्तेऽर्थे वर्तमानात् टाभ्यांभिसो भवन्ति । पुत्रेण सह स्थूलः सहैव दशभिः पुत्रैर्भारं वहति गर्दभी ।

हैम०—सहार्थे ॥ २।२।४५ ॥

सहार्थे तुल्ययोगे विद्यमानतायां च गम्यमाने नाम्नः तृतीया स्यात् । पुत्रेण सहागतः, स्थूलो गोमान् ब्राह्मणो वा ।

पा० सहयुक्तेऽप्रधाने ।२।३।१९ ॥ सिद्धा० कौ० सू ५६४ ॥

सहार्थेन युक्तेऽप्रधाने तृतीया स्यात् । पुत्रेण सहागतः पिता । एवं साकं सार्धं समंयोगेऽपि ।

२२ प्रसितावबद्धोत्सुकैः ॥ १।३।१३२ ॥

प्रसितादिभिर्युक्ते आधारे टाभ्यांभिसो भवन्ति । केशैः प्रसितः, केशेषु वा प्रसितः । केशैरवबद्धः, केशेषु अवबद्धः । केशैरुत्सुकः, केशेषूत्सुकः ।

हैम० प्रसितोत्सुकावबद्धैः ॥ २।२।४९ ॥

एतैर्युक्तादाधारवृत्तेस्तृतीया वा स्यात् । केशैः, केशेषु वा प्रसितः । गृहेण, गृहे वा उत्सुकः । केशैः केशेषु वा अवबद्धः ।

पा० प्रसितोत्सुकाभ्यां तृतीया च । २।३।४४ ॥ सि० कौ० नं० ६४१ ॥

आभ्यां योगे तृतीता स्यात् चात्सप्तमी । प्रसित उत्सुको वा हरिणा हरौ वा ।

२३ काले भाद्वाधारे १।३।१३१ ।

काले वर्तमानान्नक्षत्रवाचिनः शब्दादाधारे टाभ्यांभिसो वा भवन्ति । पुष्येण पायसमश्नीयात्, पुष्ये पायसमश्नीयात् ।

हैम०—काले भात् नवाऽऽधारे ॥ २।२।४८ ॥

कालवृत्तेर्नक्षत्रार्थादाधारे तृतीया वा स्यात्। पुष्येण पुष्ये वा पायसमश्नीयात्। काल इति किम्? पुष्येऽर्कः। भादिति किम्। तिलपुष्पेषु यत्क्षीरम्। आधार इति किं? अद्य पुष्यं विद्धि।

पा० नक्षत्रे च लुपि। २।३।४५ ॥ सि० कौ० सू० ६४२ ॥

नक्षत्रे प्रकृत्यर्थे योलुप्संज्ञया लुप्यमानस्य प्रत्ययस्यार्थस्तत्र वर्तमानात्तृतीयासप्तम्यौ स्तोऽधिकरणे। मूलेनावाहयेद्देवीं श्रवणेन विसर्जयेत्। मूले श्रवणे इति वा। लुपि किम्। पुष्ये शनिः।

२४ समो ज्ञोऽस्मृतौ चाप्ये ॥ १।३।१३ ॥

संपूर्वस्य जानातेरस्मृतौ वर्तमानस्य यदाप्यं प्राप्यं कर्म तत्र टा भ्याम् भिसो वा भवन्ति। मात्रा संजानीते, मातरं संजानीते। अस्मृताविति किम्? मातरं संजानाति, मातुः संजानाति। स्मरतीत्यर्थः।

हैम०—समो ज्ञोऽस्मृतौ वा ॥ २।२।५१ ॥

अस्मृत्यर्थस्य सञ्जानातेर्यद्व्याप्यं तद्वृत्तेस्तृतीया वा स्यात्। मात्रा मातरं वा सञ्जानीते। अस्मृताविति किम्? मातरं सञ्जानाति।

पा० संज्ञोऽन्यतरस्यां कर्मणि। २।३।२२ ॥ सि० कौ० नं० ५६७ ॥

सम्पूर्वस्य जानातेः कर्मणि तृतीया वा स्यात्। पित्रा पितरं वा संजानीते।

२५ यद्भेदैस्तद्वदाख्या ॥ १।३।१३० ॥

यस्य भेदिनः प्रकारवतोऽर्थस्य भेदैः प्रकारैः विशिष्टः तद्वतः तत्प्रकारवदर्थकस्य आख्या भवति। ततः टा भ्याम् भिसो भवन्ति। अक्ष्णा काणः। पादेन खञ्जः। प्रकृत्या दर्शनीयः। जात्या ब्राह्मणः।

हैम० यद्भेदैस्तद्वदाख्या ॥ २।२।४६ ॥

यस्य भेदिनो भेदैः प्रकारैस्तद्वतोऽर्थस्याख्या निर्देशः स्यात् तद्वाचिनस्तृतीया स्यात्। अक्ष्णा काणः, पादेन खञ्जः, प्रकृत्या दर्शनीयः, तद्वद्ग्रहणं

किम् ? अक्षिकाणं पश्य । आख्येति प्रसिद्धिपरिग्रहार्थम्, तेनाक्ष्णा दीर्घ इति न स्यात् ।

पा० येनाङ्गविकारः ।२।३।२० ॥ सि० कौ० सू० ५६५ ॥

येनाङ्गेन विकृतेनांगिनो विकारो लक्ष्यते ततः तृतीया स्यात् । अक्ष्णा काणः । अक्षिसम्बन्धिकाणत्वविशिष्ट इत्यर्थः । अङ्गविकारः किम् । अक्षि काणमस्य ।

२६ ङेभ्यांभ्यस् ॥ १।३।१३५ ॥

देयैराप्येऽप्रधानेऽर्थे वर्तमानादेकद्विबहुषु यथासंख्यं ङे भ्यां भ्यस् प्रत्ययाः भवन्ति ।

है० चतुर्थी ॥२।२।५३॥

सम्प्रदाने वर्तमानादेक-द्वि बहौ यथासंख्यं ङे-भ्यां-भ्यस्लक्षणा चतुर्थी स्यात् । द्विजाय गां दत्ते, पत्ये शेते ।

कर्मणा यमभिप्रैति स सम्प्रदानम् ॥१।४ ३२॥ सि०कौ०सू० ५६९ ॥

दानस्य कर्मणा यमभिप्रैति स सम्प्रदानसंज्ञः स्यात् ।

पा० चतुर्थी संप्रदाने ।२।३।१३ ॥ सि० कौ० सू० ५७० ॥

विप्राय गां ददाति । अनभिहित इत्येव । दीयतेऽस्मै दानीयो विप्रः ।

२८ शक्तार्थवषड्नमः स्वस्तिस्वाहास्वधाहितैः ॥ १।३।१४२ ॥

शक्तार्थैर्वषडादिभिश्च योगेऽप्रधानेऽर्थे वर्तमानाद् ङेभ्यांभ्यसो भवन्ति । शक्तः शक्नोति, प्रभुः प्रभवति जिनदत्तो देवदत्ताय । अलं मल्लो मल्लाय । वषडग्नये । नमोऽर्हद्भ्यः । स्वस्ति प्रजाभ्यः । इन्द्राय स्वाहा । स्वधा पितृभ्यः । आतुराय हितम् ।

है० शक्तार्थ-वषड्-नमः स्वस्ति-स्वाहा-स्वधाभिः ॥ २।२।६८ ॥

शक्तार्थैर्वषडादिभिश्च युक्ताच्चतुर्थी नित्यं स्यात् । शक्तः प्रभुर्वा मल्लो मल्लाय, वषडग्नये । नमोऽर्हद्भ्यः । स्वस्ति प्रजाभ्यः । स्वाहेन्द्राय । स्वधा पितृभ्यः ।

पा० नमःस्वस्तिस्वाहास्वधाऽलंवषड्योगाच्च ॥२।३।१६॥ सि० कौ० सू० ५८३ ॥

एभिर्योगे चतुर्थी स्यात्। हरये नमः। नमस्करोति देवान्। प्रजाभ्यः स्वस्ति। अग्नये स्वाहा। पितृभ्यः स्वधा।

२९ भद्रायुष्यक्षेमसुखार्थहितार्थहितैराशिषि ॥ १।३।१४१ ॥

भद्राद्यर्थैर्हितशब्देन च योगेऽप्रधानेऽर्थे वर्तमानादाशीर्विषये ङेभ्यांभ्यसो भवन्ति। भद्रमस्तु जिनशासनाय। भद्रमस्तु जिनशासनस्य। एवं भद्रं कल्याणं आयुष्यं दीर्घमायुः चिरंजीवितमस्तु देवदत्ताय देवदत्तस्य वा। क्षेमं कुशलं निरामयं भूयात् संघाय संघस्य वा। सुखं शर्म शं भवतात् प्रजाभ्यः प्रजानां वा। अर्थः प्रयोजनं कार्यं जायतां दूताय दूतस्य वा। हितं पथ्यं भूयात् जिनदत्ताय जिनदत्तस्य वा। हितग्रहणमाशिषि पक्षे षष्ठ्यर्थम्। अस्येवोत्तरेण चतुर्थी।

है० तद्भद्राऽऽयुष्य-क्षेमार्थाऽर्थेनाऽऽशिषि ॥ २।२।६६ ॥

तदिति हितसुखयोः परामर्शः। हिताद्यर्थैर्युक्तादाशिषिगम्यायां चतुर्थी वा स्यात्। हितं पथ्यं वा जीवेभ्यो जीवानां वा भूयात्। सुखं शं शर्म्म वा प्रजाभ्यः प्रजानां वा भूयात्, आयुष्यमस्तु चैत्राय चैत्रस्य वा। अर्थः कार्यं प्रयोजनं वा भूयान्मैत्राय मैत्रस्य वा।

है० हितसुखाभ्याम् ॥ २।२।६५ ॥

आभ्यां युक्ताच्चतुर्थी वा स्यात्। आमयाविने आमयाविनो वा हितम्। चैत्राय चैत्रस्य वा सुखम्।

पा० चतुर्थी चाशिष्यायुष्यमद्रभद्रकुशलसुखार्थहितैः ॥ २।३।७३ ॥ सिद्धा० कौ० ६३१ ॥

एतदर्थैर्योगे चतुर्थी वा स्यात्, पक्षे षष्ठी। आशिषि आयुष्यं चिरञ्जीवितं कृष्णाय कृष्णस्य वा भूयात्। एवं मद्रं, भद्रं, कुशलं, निरामयं, सुखं, शम्. अर्थः, प्रयोजनं, हितं, पथ्यं वा भूयात्।

२० स्थानिवुणः ॥ १।२।१२६ ॥

यस्यार्थः प्रतीयते न च प्रयोगः स स्थानी । क्रियायां तदर्थायां वुण् ल्टट् च इति वुणो विहितस्तदन्तस्य स्थानिनो धातोराप्ये कर्मणि ङेभ्यांभ्यसो भवन्ति । एधेभ्यो व्रजति ? पाकाय व्रजति । स्थानीति किम् ? एधानाहारको व्रजति । पाकं कारको व्रजति ।

है० गम्यस्याऽऽप्ये ॥ २।२।६२ ॥

यस्यार्थो गम्यते न चासौ प्रयुज्यते स गम्यः । गम्यस्य तुमो व्याप्ये वर्तमानाच्चतुर्थी स्यात् । एधेभ्यः फलेभ्यो वा व्रजति । गम्यस्येति किम् ? एधानाहर्तुं याति ।

पा० क्रियार्थोपपदस्य च कर्मणि स्थानिनः ॥२।३।१४ सि० कौ० सू० ५६१ ॥

क्रियार्था क्रिया उपपदं यस्य तस्य स्थानिनोऽप्रयुज्यमानस्य तुमुनः कर्मणि चतुर्थी स्यात् । फलेभ्यो याति । फलान्याहर्तुं यातीत्यर्थः । नमस्कुर्मो नृसिंहाय, नृसिंहमनुकूलयितुमित्यर्थः । एवं स्वयंभुवे नमस्कृत्य, इत्यादावपि ।

२१ क्रुद्द्रुहेर्ष्याऽसूयार्थैर्यं प्रति कोपो न च कर्म ॥ १।२।१२७ ॥

अमर्षकृत् क्रोधः । अपचिकीर्षा द्रोहः । अक्षमा ईर्ष्या । गुणेषु दोषाविष्करणमसूया । एतदर्थैर्धातुभिर्योगे यं प्रति कोपस्तस्मिन् वर्तमानात् ङेभ्यांभ्यसो भवन्ति न च तत्कर्म भवति । देवदत्ताय क्रुध्यति । जिनदत्ताय कुप्यति । देवदत्ताय द्रुह्यति । देवदत्ताय ईर्ष्यति । देवदत्तायासूयति ।

है० क्रुद्द्रुहेर्ष्याऽसूयार्थैर्यं प्रति कोपः ॥ २।२।२७ ॥

क्रुधाद्यर्थैर्धातुभिर्योगे यं प्रति कोपस्तत् सम्प्रदानं स्यात् । मैत्राय क्रुध्यति, द्रुह्यति, ईर्ष्यति, असूयति वा । यं प्रतीति किम् ? मनसा क्रुध्यति । कोपः इति किम् ? शिष्यस्य कुप्यति विनयार्थम् ।

पा० क्रुधद्रुहेर्ष्याऽसूयार्थानां यं प्रति कोपः ॥ १।४।३७ ॥ सि० कौ० सू० ५७५ ।

क्रुधाद्यर्थानां प्रयोगे यं प्रति कोपः सः उक्तसंज्ञः स्यात् । हरये क्रुध्यति,

द्रुह्यति, ईर्ष्यति, असूयति वा। यं प्रति कोपः किम्? भार्यामीर्ष्यति, मैनामन्यो द्राक्षीदिति। क्रोधोऽमर्षः। द्रोहोऽपकारः। ईर्ष्या अक्षमा। असूया गुणेषु दोषाविष्करणम्। द्रोहादयोऽपि कोपप्रभवा एव गृह्यन्ते।

३२ स्पृहेर्वा ॥ १।२।१२९ ॥

स्पृहेर्धातोः कर्मणि वर्तमानाच्चतुर्थी वा भवति। धर्माय स्पृहयति, धर्मं स्पृहयति।

है० स्पृहेर्व्याप्यं वा ॥ २।२।२६ ॥

स्पृहेर्व्याप्यं वा संप्रदानं स्यात्। पुष्पेभ्यः पुष्पाणि वा स्पृहयति।

पा० स्पृहेरीप्सितः ॥ १।४।३६ ॥ सि० कौ० सू० ५७४ ॥

स्पृहयतेः प्रयोगे इष्टः सम्प्रदानं स्यात्। पुष्पेभ्यः स्पृहयति। ईप्सितः किम्। पुष्पेभ्यो वने स्पृहयति। ईप्सितमात्रे इयं संज्ञा। प्रकर्षविवक्षायां तु परत्वात् कर्मसंज्ञा, पुष्पाणि स्पृहयति।

३३ मन्यस्याकाकादिषु यतोऽवज्ञा ॥ १।३।१४० ॥

यस्मादवज्ञा अन्यस्य विज्ञायते तस्मिन् काकादिवर्जिते मन्यतेराप्ये कर्मणि ङेभ्यांभ्यसो भवन्ति वा। न त्वा तृणाय मन्ये, न त्वा तृणं मन्ये। न त्वा शुने मन्ये, न त्वा श्वानं मन्ये। तृणादेरपि निकृष्टं मन्ये इत्यवजानाति। अकाकादिष्विति किम्? न त्वा काकं घूकं शृगालं मन्ये।

है० मन्यस्याऽनावादिभ्योऽतिकुत्सने ॥ २।२।६४ ॥

अतीव कुत्स्यते येन तदतिकुत्सनं। तस्मिन् मन्यतेर्व्याप्ये वर्तमानान्नावादिवर्जाच्चतुर्थी वा स्यात्। न त्वा तृणाय तृणं वा मन्ये। मन्यस्येति किम्? न त्वा तृणं मन्वे। अनावादिभ्य इति किम्? न त्वा नावं, अन्नं, शुकं, शृगालं, काकं वा मन्ये। कुत्सन इति किम्? न त्वा रत्नं मन्ये। करणाऽऽश्रयणं किम्? न त्वा तृणाय मन्ये। युष्मदो मा भूत्। अतीति किम्? त्वां तृणं मन्ये।

पा० मन्यकर्मण्यनादरे विभाषाऽप्राणिषु ॥ २।३।१७ ॥ सि० कौ० सू० ५८४।

प्राणिवर्जे मन्यतेः कर्मणि चतुर्थी वा स्यात् तिरस्कारे। न त्वां तृणं मन्ये तृणाय वा। श्यनानिर्देशात्तानादिकयोगे न। न त्वां तृणं मन्वे।

'अप्राणिष्वित्यपनीयनौकाकान्नशुकशृगालवर्जेष्विति वाच्यम्' (वा **१४६४**)।

तेन 'न त्वां नावं मन्ये' इत्यत्राऽप्राणित्वेऽपि चतुर्थी न। 'न त्वां शुने मन्ये' इत्यत्र प्राणित्वेऽपि भवत्येव।

३४ यदर्थम् ॥ १।३।१५० ॥

यत्प्रयोजनं किंचिद् विवक्ष्यते तस्मिन्नर्थे वर्तमानाद् ङेभ्यांभ्यसो भवन्ति। रथाय दारु। कुण्डलाय हिरण्यम्।

है० तादर्थ्ये ॥ २।२।५४ ॥

तस्मा इदं तदर्थम्। तद्भावे सम्बन्धविशेषे द्योत्ये च चतुर्थी स्यात्। यूपाय दारु, रन्धनाय स्थाली।

पा० तादर्थ्ये चतुर्थी वाच्या। (वा० १४५८)।

मुक्तये हरिं भजति।

३५ प्रत्याङः श्रवाभ्यर्थके ॥ १।३।१४४ ॥

प्रति आङ् इत्येताभ्यां परेण शृणोतिना युक्तेऽभ्यर्थके वर्तमानाद् ङेभ्यांभ्यसो भवन्ति। देवदत्ताय प्रतिशृणोति अभ्युपगच्छतीत्यर्थः।

है० प्रत्याङः श्रुवार्थिनि ॥ २।२।५६ ॥

प्रत्याङ्भ्यां परेण श्रुवायुक्तादर्थिन्यभिलाषुके वर्तमानाच्चतुर्थी स्यात्।

पा० प्रत्याङ्भ्यां श्रुवः पूर्वस्य कर्ता ॥ १।४।४० ॥ सि० कौ० सू० ५७८।

आभ्यां परस्य शृणोतेर्योगे पूर्वस्य प्रवर्तनारूपस्य व्यापारस्य कर्ता सम्प्रदानं स्यात्। विप्राय गां प्रतिशृणोति आशृणोति वा। विप्रेण मह्यं देहीति प्रवर्तितस्तं प्रतिजानीते इत्यर्थः।

३६ प्रत्यनोर्गृणाऽऽख्यातरि ॥ १।३।१४५ ॥

प्रत्यनु इत्येताभ्यां परेण गृशब्द इत्यनेन युक्ते आख्यातरि वर्तमानाद्-

ङेभ्यांभ्यसो भवन्ति। उपाध्यायाय प्रतिगृणाति, अनुगृणाति। उपाध्याये-नोक्तमनुब्रवीति।

है० प्रत्यनोर्गृणाऽऽख्यातरि ॥ २।२।५७ ॥

समानम्।

पा० अनुप्रतिगृणश्च ॥ १।४।४१ ॥ सि० कौ० नं० ५७९ ॥

आभ्यां गृणातेः कारकं पूर्वव्यापारस्य कर्तृभूतमुक्तसंज्ञं स्यात्। होत्रेऽनुगृणाति-प्रतिगृणाति वा। होता प्रथमं शंसति, तमध्वर्युः प्रोत्साहयतीत्यर्थः।

३७ श्लाघह्नुङ्स्थाशपां प्रयोज्ये ॥ १।३।१४८ ॥

श्लाघादिभिर्युक्ते प्रयोज्ये वर्तमानाच्चतुर्थी भवति। देवदत्ताय श्लाघते। स्वगुणादिकं धर्मं विज्ञापयितुमिच्छति इत्यर्थः। चैत्राय ह्नुते, छात्रेभ्यः तिष्ठते, मैत्राय शपते।

है० श्लाघह्नुस्था-शपां प्रयोज्ये ॥ २।२।६० ॥

समानम्।

पा० श्लाघह्नुङ्स्थाशपां ज्ञीप्स्यमानः ॥ १।४।३४ ॥ सि० कौ० नं० ५७२ ॥

एषां प्रयोगे बोधयितुमिष्टः सम्प्रदानं स्यात्। गोपीस्मरात्कृष्णाय श्लाघते, ह्नुते, तिष्ठते, शपते वा। ज्ञीप्स्यमानः किम्। देवदत्ताय श्लाघते पथि।

३८ रुचिक्लृप्यर्थधारिभिः प्रेयविकारोत्तमर्णेषु ॥ १।३।१४१ ॥

रुच्यर्थैर्धातुभिर्युक्ते प्रेये, क्लृप्यर्थैर्विकारे, धारिणा च उत्तमर्णे वर्तमानाच्चतुर्थी भवति। साधवे रोचते धर्मः। सदृशे स्वदते तत्त्वम्। श्लेष्मणे कल्पते दधि। वधाय जायते रागः। चैत्राय शतं धारयते मैत्रः।

है० रुचिकृप्यर्थ धारिभिः प्रेय-विकारोत्तमर्णेषु ॥ २।२।५५ ॥

रुच्यर्थैः कृप्यर्थैर्धारिणा च योगे यथासंख्यं प्रेय-विकारोत्तमर्णवृत्तेश्चतुर्थी स्यात्। मैत्राय रोचते धर्मः, मूत्राय कल्पते यवागूः, चैत्राय शतं धारयति।

पा० रुच्यर्थानां प्रियमाणः ॥ १।४।३३ ॥ सि० कौ० नं० ५७१ ॥

रुच्यर्थानां धातूनां प्रयोगे प्रीयमाणोऽर्थः सम्प्रदानं स्यात्। हरये रोचते

भक्तिः। अन्यकर्तृकोऽभिलाषो रुचिः। हरिनिष्ठप्रीतेर्भक्तिः कर्त्री। प्रीयमाणः किम्? देवदत्ताय रोचते मोदकः पथि।

पा० धारेरुत्तमर्णः ॥ १।४।३५ ॥ सि० कौ० नं० ५७३ ॥

धारयतेः प्रयोगे उत्तमर्ण उक्तसंज्ञः स्यात्। भक्ताय धारयति मोक्षं हरिः। उत्तमर्णः किम्। देवदत्ताय शतं धारयति ग्रामे।

३९ उत्पातेन ज्ञाप्ये ॥ १।२।१४७ ॥

उत्पातेन ज्ञाप्ये वर्तमानाद् ङेभ्यांभ्यसो भवन्ति। श्लोकः—

वाताय कपिला विद्युदातपायातिलोहिनी।
पीता वर्षाय विज्ञेया दुर्भिक्षाय सिता भवेत् ॥

वाताय ज्ञापयतीत्यर्थः।

है० उत्पातेन ज्ञाप्ये ॥ २।२।५९ ॥

उत्पात आकस्मिकं निमित्तम्। तेन ज्ञाप्ये वर्तमानाच्चतुर्थी स्यात्।

पा० उत्पातेन ज्ञापिते च (वा० १४६०)

वाताय कपिला विद्युत्।

४१ हेतौ गुणेऽस्त्रियाम् ॥ १।२।१५४ ॥

अस्त्रीलिंगे गुणे द्रव्याश्रिते पर्याये हेतौ वर्तमानादुङसिभ्यामुभ्यसो वा भवन्ति। जाड्याद् जाड्येन वा बद्धः। ज्ञानाद् ज्ञानेन वा मुक्तः। अस्त्रियामिति किम्? जडतया बद्धः। बुद्धया मुक्तः।

है० गुणादस्त्रियां नवा ॥ २।२।७७ ॥

अस्त्रीवृत्तेर्हेतुभूतगुणवाचिनः पञ्चमी वा स्यात्।

पा० विभाषा गुणेऽस्त्रियाम् ॥ २।३।२५ ॥ सि० कौ० नं० ६०२ ॥

गुणेहेतावस्त्रीलिंगे पंचमी वा स्यात्। जाड्यात् जाड्येन वा बद्धः। गुणे किम्? धनेन कुलम्। अस्त्रियाम् किम्? बुद्धया मुक्तः। 'विभाषा' इति योगविभागादगुणेस्त्रियां च क्वचित्। धूमादग्निमान्। नास्ति घटोऽनुपलब्धेः।

४२ अपायेऽवधौ ॥ १।२।१५६ ॥

अपायो विभागः विश्लेषः। तस्मिन् विषये निर्दिष्टे प्रतीयमाने वा योऽव-

धिरप्रधानं तस्मिन् ङसिभ्यांभ्यसो भवंति। ग्रामादपैति। ग्रामादागच्छति। पर्वतादवरोहति। यवेभ्यां गां निवारयति। प्रतीयमानेऽर्थे कुसूलात्पचति, ततो गृहीत्वेत्यर्थः।

है० पञ्चम्यपादाने ॥ २।२।६९ ॥

अपादाने एक द्वि बहौ यथासंख्यं ङसिभ्यांभ्यस्लक्षणा पंचमी स्यात्। ग्रामाद् गोदोहाभ्यां वनेभ्यः वा आगच्छति।

पा० ध्रुवमपायेऽपादानम् ॥ १।४।२४ ॥ सि० कौ० नं० ५८६ ॥

अपायो विश्लेषः, तस्मिन्साध्ये। ध्रुवमवधिभूतं कारकमपादानं स्यात्।

अपादाने पञ्चमी ॥ २।३।२८ ॥ सि० कौ० नं० ५८७ ॥

ग्रामादायाति। धावतोऽश्वात्पतति। कारकं किम्? वृक्षस्य पर्णं पतति।

जुगुप्साविरामप्रमादार्थानामुपसंख्यानम् (वा० १०७९)

पापाज्जुगुप्सते, विरमति। धर्मात्प्रमाद्यति।

४३ ऋणे ॥ १।३।१५५ ॥

हेतौ ऋणे वर्तमानान्नित्यं ङसिभ्यांभ्यसो भवन्ति वा। शताद् बद्धः सहस्राद्बद्धः।

है० ऋणाद्धेतोः ॥ २।२।७६ ॥

हेतुभूतऋणवाचिनः पंचमी स्यात्। शताद्बद्धः हेतोरिति किम्? शतेन बद्धः।

पा० अकर्तर्यृणे पंचमी ॥ २।३।२४ ॥ सि० कौमु० नं० ६०१ ॥

कर्तृवर्जितं यदृणं हेतुभूतं ततः पंचमी स्यात्। शताद्बद्धः। अकर्तरि किम्। शतेन बन्धितः।

४४ ङसिभ्यांभ्यस्स्तोकाल्पकतिपयकृच्छ्रादसत्त्वे ॥ १।३।१५२ ॥

यतो द्रव्ये शब्दप्रवृत्तिः स पर्यायो गुणः सत्त्वं, तेनैन रूपेणोच्यमानमसत्त्वं, तस्मिन् करणे स्तोकादिभ्यः एकद्विबहुषु ङसिभ्यांभ्यसो भवन्ति वा। स्तोकात् स्तोकेन, अल्पात् अल्पेन, कतिपयात् कतिपयेन, कृच्छ्रात् कृच्छ्रेण मुक्तः। असत्त्व इति किम्? स्तोकेन विषेण हतः। अल्पेन शेथुना मुक्तः।

हे० स्तोकाल्प-कृच्छ्र-कतिपयादसत्त्वे करणे ॥ २।२।७९ ॥

समानम् ।

पा० करणे च स्तोकाल्पकृच्छ्रकतिपयस्यासत्त्ववचनस्य ॥ २।३।३३ ॥ सि० कौ० नं० ६०४ ॥

एभ्योऽद्रव्यवचनेभ्यः करणे तृतीयापंचम्यौ स्तः। स्तोकेन स्तोकाद्वा मुक्तः। द्रव्ये तु स्तोकेन विषेण हतः।

४५ आख्यातर्युपयोगे ॥ १।३।१५७ ॥

आख्याता प्रतिपादयिता। उपयोगो नियमपूर्वकं विद्याग्रहणम्। आख्यातरि वर्तमानादुपयोगे विषये ङसिभ्यांभ्यसो भवन्ति। उपाध्यायादधीते—आगमयति। आचार्याच्छृणोति—अधिगच्छति। उपयोग इति किम्? नटस्य शृणोति।

हे० आख्यातर्युपयोगे ॥ २।२।७३ ॥

समानम्।

पा० आख्यातोपयोगे ॥ १।४।२९ ॥ सि० कौ० नं० ५९१ ॥

नियमपूर्वकविद्यास्वीकारे वक्ता प्राक्संज्ञः स्यात्। उपाध्यायादधीते। उपयोगे किम्। नटस्य गाथां शृणोति।

४६ आङा ॥ १।३।१५८ ॥

अवधाविति वर्तते। आङा योगे अवधौ ङसिभ्यांभ्यसो भवन्ति। आपाटलीपुत्रात् वृष्टो देवः। आकुमारेभ्यो यशः शाकटायनस्य गतम्।

हे० आङाऽवधौ ॥ २।२।७० ॥

अवधिर्मर्यादा अभिविधिश्च। तद्वृत्तेराङा युक्तात् पंचमी स्यात्। आपाटलिपुत्राद् वृष्टो मेघः।

पा० आङ्मर्यादावचने ॥ १।४।८९ ॥ सि० कौ० नं० ५९७।

आङ्मर्यादायामुक्तसंज्ञः स्यात्। वचनग्रहणादभिविधावपि।

४७ वर्ज्येऽपपरिणा ॥ १।३।१५९ ॥

अपपरि इत्येताभ्यां युक्ते वर्ज्ये ङसिभ्यांभ्यसो भवन्ति। अपपाटलीपुत्राद् अपत्रिगर्तेभ्यो वृष्टो देवः । तत्र गर्तान् वर्जयित्वेत्यर्थः । एवं परियोगेऽपि ।

है० पर्यपाभ्यां वर्ज्ये ॥ २।२।७१ ॥

वर्ज्ये वर्जनीयेऽर्थे वर्तमानात् पर्यपाभ्यां युक्तात् पञ्चमी स्यात् । परि अप वा पाटलिपुत्राद् वृष्टो मेघः । वर्ज्य इति किम् ? अपशब्दो मैत्रस्य ।

पा० पञ्चम्यपाङ्परिभिः ॥ २।३।१० ॥ सि० कौ० नं० ५९८ ।

एतैः कर्मप्रवचनीयैर्योगे पंचमी स्यात् । अपहरेः, परिहरेः संसारः । परिरत्र वर्जने । लक्षणादौ तु हरिंपरि । आमुक्तेःसंसारः । आ सकलाद्ब्रह्म ।

४७ प्रतिनिधि प्रतिदाने प्रतिना ॥ १।३।१६० ॥

प्रतिनिधौ प्रतिदाने च वर्तमानेन प्रतिना युक्ताद् ङसिभ्यांभ्यसो भवन्ति । प्रद्युम्नो वासुदेवात् प्रति, सदृश इत्यर्थः । तिलेभ्यः प्रतिमाषान् प्रयच्छति । तिलान् गृहीत्वामाषान् ददाति ।

है० यतः प्रतिनिधि-प्रतिदाने प्रतिना ॥ २।२।७२ ॥

प्रतिनिधिर्मुख्यसदृशोऽर्थः । प्रतिदानं गृहीतस्य विशोधनं । ते यतः स्यातां तद्वाचिनः प्रतिना योगे पंचमी स्यात् । प्रद्युम्नो वासुदेवात् प्रति । तिलेभ्यः प्रतिमाषानस्मै प्रयच्छति ।

पा० प्रतिनिधि प्रतिदाने च यस्मात् ॥ २।३।११ ॥ सि० कौ० नं० ६०० ।

अत्र कर्मप्रवचनीयैर्योगे पंचमी स्यात् । प्रद्युम्नः कृष्णात्प्रति । तिलेभ्यः प्रतियच्छति माषान् ।

४८ स्थानिव्यकर्माधारे ॥ १।३।१६१ ॥

स्थाने य्यादेशान्तेन युक्ते कर्मण्याधारे च ङसिभ्यांभ्यसो भवन्ति । प्रासादात्प्रेक्षते । आसनात्प्रेक्षते । स्थानिग्रहणं किम् ? प्रासादमारुह्य प्रेक्षते ।

है० गम्ययपः कर्माऽऽधारे ॥ २।२।७४ ॥

गम्यस्याप्रयुज्यमानस्य यबन्तस्य कर्माऽऽधारवाचिनः पंचमी स्यात् । प्रासादादासनाद्वा प्रेक्षते, गम्यग्रहणं किम् ? प्रासादमारुह्य शेते ।

पा० ल्यब्लोपेकर्मण्यधिकरणे च (वा० १४७४-१४७५) ।

प्रासादात्प्रेक्षते । आसनात्प्रेक्षते । प्रासादमारुह्य, आसने उपविश्य, प्रेक्षते इत्यर्थः । श्वशुराज्जिहेति श्वशुरं वीक्ष्येत्यर्थः ।

४९ प्रत्ययः कृतोऽषष्ठ्याः ॥ १।१।४१ ॥

इह यःकृतो विहितः स प्रत्ययसंज्ञो वेदितव्यः । अषष्ठ्याः षष्ठ्यन्तार्थः षष्ठी न चेत् स षष्ठ्यन्तार्थविहितो भवति । आगमो विकारो वेत्यर्थः ङी-राज्ञी । सु-औ-जस्-वृक्षः वृक्षौ वृक्षाः ।

परः ॥ १।१।४४ ॥

यः प्रत्ययः स प्रकृतेः पर एव भवति । वृक्षः वृक्षौ वृक्षाः ।

५० ङसोसाम् ॥ १।२।६३ ॥

अप्रधानेऽर्थे वर्तमानाद् एकद्विबहुषु यथासंख्यं ङस्ओसाम् इत्येते प्रत्ययाः भवन्ति योगे सम्बन्धे । राज्ञः पुरुषः । देवदत्तयोः पुत्रः ।

है० शेषे ॥ २।२।८१ ॥

कर्मादिभ्योऽन्यस्तदविवक्षारूपः स्वस्वामिभावादिसम्बन्धविशेषः शेष-स्तत्र षष्ठी स्यात् । राज्ञः पुरुषः, उपगोरपत्यम्, माषाणामश्नीयात् ।

पा० षष्ठी शेषे ॥ २।३।५० ॥ सि० कौ० नं० ६०६ ।

कारकप्रातिपदिकार्थव्यतिरिक्तः स्वस्वामिभावादिसम्बन्धः शेषः, तत्र षठी स्यात् । राज्ञः पुरुषः । कर्मादीनामपि सम्बन्धमात्रविवक्षायां षष्ठ्येव । सतां गतम् । सर्पिषो जानीते । मातुः स्मरति एधोदकस्योपस्कुरुते । भजे-शम्भोश्चरणयोः । फलानां तृप्तः ।

५२ करणे ज्ञोऽज्ञाने ॥ १।३।१६५ ॥

जानातेर्ज्ञानार्थे वर्तमानस्य यत्करणं तस्मिन् ङसोसामो भवन्ति । ज्ञानमवबोधः । सर्पिषो जानीते, सर्पिषा करणभूतेन प्रवर्तत इत्यर्थः । अज्ञान इति किम् ? स्वरेण पुत्रं जानाति ।

है० अज्ञाने ज्ञः षष्ठी ॥ २।२।८० ॥

अज्ञानार्थस्य ज्ञो यत्करणं तद्वाचिन एक-द्वि-बहौ यथासंख्यं ङसोसांलक्षणः

षष्ठी नित्यं स्यात् । सर्प्पिषः, सर्प्पिषोः सर्प्पिषां वा जानीते । अज्ञान इति किम् ? स्वरेण पुत्रं जानाति । करण इत्येव । तैलं सर्प्पिषो जानाति ।

पा० ज्ञोऽविदर्थस्य करणे ॥ २।३।५१ ॥ सि० कौ० नं० ६१२ ॥

जानातेरज्ञानार्थस्य करणे शेषत्वेन विवक्षिते षष्ठी स्यात् । सर्पिषो ज्ञानम् ।

५३ क्तस्य सदाधारे ॥ १।३।१६७ ॥

सति वर्तमाने यः क्तः आधारे च तदन्तस्य धातोः कर्मणि कर्तरि च ङसोसामो भवन्ति । सति क्तः—राज्ञां मतः, राज्ञां पूजितः, प्रजानां कान्तः । आधारे क्तः—इदमोदनस्य भुक्तम् । इदं सक्तूनां पीतम्, इदमेषामासितम् ।

है० क्तयोरसदाधारे ॥ २।२।९१ ॥

सतोवर्तमानादाधाराच्चान्यत्रार्थे यौ क्तक्तवतू तयोः कर्मकर्त्रोः षष्ठी न स्यात् । कटः कृतो मैत्रेण, ग्रामं गतवान् । असदाधार इति किम् ? राज्ञां पूजितः । इदं सक्तूनां पीतम् ।

पा० क्तस्य च वर्तमाने ॥ २।३।६७ ॥ सि० कौ० नं० ६२५ ।

वर्तमानार्थस्य क्तस्य योगे षष्ठी स्यात् । राज्ञां मतो बुद्धः पूजितो वा ।

अधिकरणवाचिनश्च ॥ २।३।६८ ॥ सि० कौ० नं० ६२६ ।

क्तस्य योगे षष्ठी स्यात् । इदमेषामासितं शयितं गतं भुक्तं वा ।

५४ कर्मणि गुणे ॥ १।३।१६९ ॥

उणादिवर्जितस्य कृतः कर्मणि गुणे ङसोसामो वा भवन्ति । नेता अश्वस्य स्रुघ्नम् । गुण इति किम ? नेताऽश्वस्य । कर्मान्तरापेक्षत्वं गुणत्वं, अप्रधानाधिकारादतो द्विकर्मकाणामिहोदाहरणम् ।

है० कर्म्मणि कृतः ॥ २।२।८३ ॥

कृदन्तस्य कर्मणि षष्ठी स्यात् । अपां स्रष्टा, गवां दोहः । कर्मणीति किम् ? शस्त्रेण भेत्ता, स्तोकं पक्ता । कृत इति किम् ? भुक्तपूर्वी ओदनम् ।

पा० कर्तृकर्मणोः कृति ॥ २।३।६५ ॥ सि० कौ० नं० ६२३ ।

कृद्योगे कर्तरि कर्मणि च षष्ठी स्यात् । कृष्णस्य कृतिः । जगतः कर्ता

कृष्णः । 'गुणकर्मणि वेष्यते' (वा० ५०४१) नेता अश्वस्य स्रुघ्नस्य स्रुघ्नं वा । कृति किम् । तद्धिते मा भूत् । कृतपूर्वी कटम् ।

५५ आधारे ॥ १।३।१७६ ॥

क्रियाश्रयस्य कर्तुः कर्मणो वा यः आधारः अधिकरणं तस्मिन् ङ्योस्सुपो भवन्ति । आसने आस्ते । स्थाल्यां पचति । गङ्गायां घोषः । तिलेषु तैलम् । आकाशे शकुनयः । कृष्णा गोषु सम्पन्नक्षीरतमा, कृष्णा गवां सम्पन्नक्षीरतमा इति समुदायस्यैकदेशं प्रत्याधारभावविषयविवक्षायां सप्तमी । सम्बन्धविवक्षायां तु षष्ठी। यथा वृक्षे शाखा वृक्षस्य शाखा इति निर्धारणन्तु कृष्णेत्यादेः पदान्तरात्।

है० सप्तम्यधिकरणे ॥ २।२।९५ ॥

अधिकरणे एक-द्वि-बहौ यथासंख्यं ङ्योस्सुपरूपा सप्तमी स्यात् । कटे आस्ते, दिवि देवाः, तिलेषु तैलम् ।

पा० आधारोऽधिकरणम् ॥ १।४।४५ ॥ सि० कौ० नं० ६३२ ।

कर्तृकर्मद्वारा तन्निष्ठक्रियाया आधारः कारकमधिकरणसंज्ञः स्यात् ।

सप्तम्यधिकरणे च ॥ २।३।३६ ॥ सि० कौ० नं० ६३३ ।

अधिकरणे सप्तमी स्यात्, चकाराद्दूरान्तिकार्थेभ्यः । औपश्लेषिको वैषयिकोऽभिव्यापकश्चेत्याधारस्त्रिधा । कटे आस्ते, स्थाल्यां पचति, मोक्षे इच्छास्ति, सर्वस्मिन्नात्मास्ति वनस्य दूरे अन्तिके वा ।

५६ हेतौ कर्मणा ॥ १।३।१७२ ॥

कर्मणा युक्ते हेतौ वर्तमानाद् ङ्योस्सुपो भवन्ति । तृतीयापवादः ।

> चर्मणि द्वीपिनं हन्ति, दन्तयोर्हन्ति कुंजरम् ।
> बालेषु चमरीं हन्ति सीम्नि पुष्कलको हतः ॥

है० तद्युक्ते हेतौ ॥ २।२।१०० ॥

तेन व्याप्येन युक्ते हेतौ वर्तमानात् सप्तमी स्यात् । चर्मणि द्वीपिनं इत्यादि । तद्युक्त इति किम् ? वेतनेन धान्यं लुनाति ।

पा० निमित्तात्कर्मयोगे (वा० १४९०)

निमित्तमिह फलम् । योगः संयोगसमवायात्मकः ।

चर्मणि द्वीपिनं इत्यादि ।

५७ साधुनिपुणेनार्चायाम् ॥ १।३।१७३ ॥

साधु निपुण इत्येताभ्यां युक्ते अर्चायां गम्यमानायां ङ्योस्सुपो भवन्ति । साधुर्देवदत्तो मातरि । निपुणो जिनदत्तः पितरि । अन्यत्रसाधुः मृत्यो राज्ञः । तत्त्वाख्याने न भवति ।

है० साधुना ॥ २।२।१०२ ॥

निपुणेन चार्चायाम् ॥ २।२।१०३ ॥

निपुण साधु शब्दाभ्यां युक्तादप्रत्यादौ सप्तमी स्यात्, अर्चायाम् । मातरि निपुणः साधुर्वा । अर्चायामिति किम् ? निपुणो मैत्रो मातुः । मातैवैनं निपुणं मन्यत इत्यर्थः । अप्रत्यादावित्येव ? निपुणो मैत्रो मातरं प्रति परि अनु अभि वा ।

पा० साधुनिपुणाभ्यामर्चायां सप्तम्यप्रतेः ॥ २।३।४३ ॥ सि० कौ० नं० ६४० ।

आभ्यां योगे सप्तमी स्यादर्चायाम्, न तु प्रतेः योगे । मातरि साधुर्निपुणो वा । अर्चायाम् किम् ? निपुणो राज्ञो भृत्यः । इह तत्त्वकथने तात्पर्यम् । **'अप्रत्यादिभिरिति वक्तव्यम्' (वा० १४९१)** । साधुर्निपुणो वा मातरं प्रति परि अनु वा ।

५८ स्वेशेऽधिना ॥ १।३।१७४ ॥

अधीत्यनेन योगे स्वे ईशितव्ये ईशे ईशितरि स्वामिनि चार्थे वर्तमानाद् ङ्योस्सुपो भवन्ति । स्वे—अधिमगधेषुश्रेणिकः । अध्यवन्तिषु प्रद्योतः । ईशे—अधिश्रेणिके मगधाः । अधिप्रद्योतेऽवन्तयः ।

है० स्वेशेऽधिना ॥ २।२।१०४ ॥

स्वे ईशितव्ये ईशे च वर्तमानादधिना युक्तात् सप्तमी स्यात् । अधिमगधेषु श्रेणिकः, अधिश्रेणिके मगधाः ।

पा० अधीरीश्वरे ॥ १।४।९७ ॥ सि० कौ० नं० ६४४ ।

स्वस्वामिसम्बन्धे अधि कर्मप्रवचनीयसंज्ञः स्यात् ।

यस्मादधिकं यस्य चेश्वरवचनं तत्र सप्तमी ॥ २।३।९ ॥ सि० कौ० नं० ६४५ ।

अत्र कर्मप्रवचनीय युक्ते सप्तमी स्यात् । उपपरार्धे हरेर्गुणाः । परार्धादधिका इत्यर्थः । ऐश्वर्ये तु स्वस्वामिभ्यां पर्यायेण सप्तमी । अधिभुवि रामः । अधिरामे भूः ।

५९ उपेनाधिकिनि ॥ १।३।१७५ ॥

उप इत्यधिकाधिकिसम्बन्धं द्योतयति । तेन युक्ते अधिकिनि ङ्योस्सुपो भवन्ति । उपखार्यां द्रोणः । उपनिष्के कार्षापणम् । द्रोणकार्षापणाभ्यामाधिकौ खारीनिष्कावित्यर्थः ।

है० उपेनाऽधिकिनि ॥ २।२।१०५ ॥

उपेन युक्तादधिकिनि वाचिनः सप्तमी स्यात् । उपखार्यां द्रोणः ।

पा० उपोऽधिके च ॥ १।४।८७ ॥ सि० कौ० नं० ५५१ ।

अधिके हीने च द्योत्ये उपेत्यव्ययं प्राक्संज्ञं स्यात् । अधिके, सप्तमी-वक्ष्यते । हीने, उपहरिं सुराः ।

६० सुजर्थैः काले वा ॥ १।३।१७७ ॥

सुचोऽर्थो येषां प्रत्ययानां तदन्तैर्युक्ते काले आधारे ङ्योस्सुपो भवन्ति । द्विरह्नि भुंक्ते । द्विरह्नो भुंक्ते, मासे पञ्चकृत्वो भुंक्ते, मासस्य पञ्चकृत्वो भुङ्क्ते । बहुधाह्नि भुङ्क्ते, बहुधाह्नो भुङ्क्ते । आधार इति किम् ? द्विरह्नो भुङ्क्ते । काल इति किम् ? द्विरध्वनि भुङ्क्ते ।

है० नवासुजर्थैः काले ॥ २।२।९६ ॥

सुचोऽर्थो वारो येषां तत्प्रत्ययान्तैर्युक्तात् कालेऽधिकरणे वर्तमानात् सप्तमी वा स्यात् ।

पा० कृत्वोऽर्थप्रयोगे कालेऽधिकरणे ॥ २।३।६४ ॥ सि० कौ० नं० ६२२ ।

कृत्वोऽर्थानां प्रयोगे कालवाचिन्यधिकरणे शेषे षष्ठी स्यात् । पंचकृत्वोऽह्नो भोजनम् । द्विरह्नो भोजनम् । शेषे किम् ? द्विरहन्यध्ययनम् ।

६१ कुशलाऽऽयुक्तेनाऽऽसेवायाम् ॥ १।३।१७८ ॥

कुशल आयुक्त इत्येताभ्यां युक्ते आधारे आसेवायां तात्पर्ये गम्यमाने ङ्योस्सुपो वा भवन्ति । कुशलो विद्याग्रहणे, कुशलो विद्याग्रहणस्य । आयुक्तस्तपश्चरणे, आयुक्तस्तपश्चरणस्य । अन्यत्र कुशलश्चित्रकर्मणि, न च करोति । आयुक्तो गौः शकटे, आकृष्य युक्त इत्यर्थः ।

है० कुशलाऽऽयुक्तेनाऽऽसेवायाम् ॥ २।२।९७ ॥

आभ्यां युक्तादाधारवाचिनः सप्तमी वा स्यात्, आसेवायां तात्पर्ये । कुशलो विद्यायां विद्याया वा । आयुक्तस्तपसि तपसो वा । आसेवायामिति किम् ? कुशलश्चित्रे, न तु करोति । आयुक्तो गौः शकटे आकृष्य युक्त इत्यर्थः ।

पा० आयुक्तकुशलाभ्यांचासेवायाम् ॥ २।३।४० ॥ सि० कौ० नं० ६३७ ।

आभ्यां योगे षष्ठीसप्तम्यौ स्तः तात्पर्येऽर्थे । आयुक्तो व्यापारितः । आयुक्तः कुशलो वा हरिपूजने हरिपूजनस्य वा । आसेवायां किम् ? आयुक्तो गौः शकटे । ईषद्युक्त इत्यर्थः ।

६२ स्वामीश्वराधिपतिदायादसाक्षिप्रतिभूप्रसूतैश्च ॥ १।३।१७९ ॥

स्वाम्यादिभिर्युक्तेऽप्रधाने वा ङ्योस्सुपो भवन्ति । गोषु स्वामी, गवां स्वामी । गोष्वीश्वरः, गवामीश्वरः । गोषु दायादः, गवां दायादः । गोषु साक्षी, गवां साक्षी । गोषु प्रतिभूः, गवां प्रतिभूः । गोषु प्रसूतः, गवां प्रसूतः ।

है० स्वामीश्वराधिपतिदायादसाक्षिप्रतिभूप्रसूतैः ॥ २।२।९८ ॥

एभिर्युक्तात् सप्तमी वा स्यात् । गोषु गवां वा स्वामी, ईश्वरः…… ।

पा० स्वामीश्वराधिपतिदायादसाक्षिप्रतिभूप्रसूतैश्च ॥ २।३।३९ ॥ सि० कौ० नं० ६३६ ।

एभिः सप्तभिर्योगे षष्ठीसप्तम्यौ स्तः । षष्ठ्यामेव प्राप्तायां पाक्षिकसप्तम्यर्थं वचनं । गवां-गोषु वा स्वामी, प्रसूतः इत्यादि ।

६२ हेतौ हेत्वर्थैः सर्वाः प्रायः ॥ १।३।१९५ ॥

हेतुर्निमित्तं कारणमिति पर्यायाः, तदर्थैर्योगे हेतौ अप्रधाने प्रायेण सर्वा विभक्त्यो भवन्ति। धनेन हेतुना, धनाय हेतवे, धनाद् हेतोः, धनस्य हेतोः, धने हेतौ वसति। कं हेतुं, केन हेतुना, कस्मै हेतवे, कस्माद्धेतोः, कस्य हेतोः, कस्मिन् हेतौ तिष्ठति ? एवं निमित्तकारणप्रयोजनैरपि नेयम्। हेताविति किम् ? कस्य हेतुः। हेत्वर्थैरिति किम् ? केन वसति ? प्रायः इति प्रयोगानुसरणार्थम्।

है० हेत्वर्थैस्तृतीयाद्याः ॥ २।२।११८ ॥

हेतुर्निमित्तं तद्वाचिभिर्युक्तात् तृतीयाद्याः स्युः। धनेन हेतुना, धनाय-हेतवे, धनाद्धेतोः, धनस्य हेतोः धने हेतौ वा वसति। एवं निमित्तादिभिरपि।

है० सर्वादेः सर्वाः ॥ २।२।११९ ॥

हेत्वर्थैर्युक्तात् सर्वादेः सर्वा विभक्तयः स्युः। को हेतुः, कं हेतुम्, केन हेतुना, कस्मै हेतवे, कस्माद्धेतोः कस्य हेतोः, कस्मिन् हेतौ वा आयाति।

पा० षष्ठी हेतुप्रयोगे। २। ३। २६ ॥ सि० कौ० नं० ६०७।

हेतुशब्दप्रयोगे हेतौ द्योत्ये षष्ठी स्यात्। अन्नस्य हेतो वसति।

सर्वनाम्नस्तृतीया च। २। ३। २७ ॥ सि० कौ० नं ६०८।

सर्वनाम्नो हेतुशब्दस्य च प्रयोगे हेतौ द्योत्ये तृतीया स्यात् षष्ठी च केन हेतुना वसति। कस्य हेतोः।

निमित्तपर्यायप्रयोगे सर्वासां प्रायदर्शनम् (वा० १४७२)

किं निमित्तं वसति, केन निमित्तेन, कस्मै निमित्ताय इत्यादि। एवं किं कारणम्, को हेतुः, किं प्रयोजनम् इत्यादि। प्रायग्रहणादसर्वनाम्नः प्रथमा-द्वितीये न स्तः। ज्ञानेन निमित्तेन हरिः सेव्यः, ज्ञानाय निमित्ताय इत्यादि।